संस्कृत-भवितव्यम्

● निरन्तरं पञ्चषष्टिवर्षाणि प्रकाश्यमानं विश्वस्य एकमेव संस्कृतसाप्ताहिकम् ●

संस्कृत-भाषा-प्रचारि-सभायाः मुखपत्रम्

अङ्क-मूल्यम् रु. ५/- वा. शु. : रु. २५०/-	PRINTED MATTER	वृत्तपत्र-पञ्जीयन-संख्या RN 11454/57
Core Banking Facility : Name : Sanskrit Bhasha Pracharini Sabha A/c No. : 30362855441 IFSC/CIF Code : SBIN0004872	डाकप्रेषण पञ्जीयनसंख्या NGP-27 Postage Licence No. 9 संपादिका डॉ. लीना रस्तोगी	सहसंपादिकाद्वयम् डॉ. वीणा गानु, डॉ. शारदा गाडगे

संस्थापक-संपादक:
स्व. डॉ. श्री. भा. वर्णेकर

वर्षम् ६५, अङ्कः ४९
शनि. दि. २० फेब्रुवारी २०१६,
माघ शु. १३ शके १९३७,
युगाब्द ५११७

ISBN 978-0-00-000978-4 18900

13 Digit ISBN : 978-1-890041-04-5
Barcode ISBN : 978-0-00-000978-4:18900

प्रबन्धिका
डॉ. प्रज्ञा देशपाण्डे
prabandhika.sanskbhavitavyam@gmail.com

प्रकाशक:
डॉ. चन्द्रगुप्त वर्णेकर
०९३७०८०३९१३
cswarnekar@gmail.com

संस्कृत-भवनम्,
२, पश्चिमः उच्च-न्यायालय-मार्गः, नागपुरम् - ४४० ००१.

www.sanskritbps.org

■ **देशद्रोहस्य कृष्णाङ्गारतमसा धूमायते जवाहरविद्याक्षेत्रम् (जे.एन्.यू.)** यस्मिन् किल उद्घोष्यन्ते पाकिस्तानस्य जयकारः, श्रद्धया च स्मर्यन्ते आतङ्कवादिनः। यः भारतस्य आद्यप्रधानमन्त्री जवाहरलालनेहरूः स्वदेशस्य स्वातन्त्र्याय कतिपयवर्षाणि कारावासं स्वीकृतवान्, तस्य नाम्ना राजधान्यां संस्थापिते (जे.एन्.) विश्वविद्यालये तादृशं राष्ट्रविरोधिप्रदर्शनं दण्डनीयमेव भवितुमर्हति। कुत्र हीरकः (जवाहरः) कुत्र च कृष्णाङ्गारः! *(द्रष्टव्यं सम्पादकीयम्)*

■ **भारते निर्माणम् (मेक इन् इण्डिया) योजनायाः महाराष्ट्रे अग्निपरीक्षा -** उपक्रमस्यास्य प्रारम्भः मुम्बय्यां चौपाटी-गिरगांवसागरतटे स्वयं प्रधानमन्त्रिणा ९ फेब्रुवारीदिनाङ्के विहितं आसीत्। तस्मिन्नेव दिने सायङ्काले सांस्कृतिकसमारोहे रङ्गमञ्चः अग्निभक्षः अभूत्, दिष्ट्या न कोऽपि जीवहानिः सञ्जाता। नूनम् अग्निपरीक्षोत्तीर्णा अभवत् इयं योजना अनया घटनया!

■ **कालिदाससंस्कृतविद्यापीठस्य षष्ठतमः दीक्षान्त समारोहः** अद्य प्रातः एकादशवादने रामटेकपरिसरे भवति। तस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य कुलगुरवः **डॉ. पी. एन्. शास्त्रिणः** मुख्यातिथयः, राष्ट्रियाध्यापक-शिक्षा-परिषदः अध्यक्षः **सन्तोषपाण्डा**महोदयाः च विशिष्टातिथयः भवन्ति। कुलगुरुः **डॉ. उमावैद्य** आध्यक्ष्यं करोति।

■ **वसन्तपञ्चमीतिथौ** अथवा माघमासस्य शुक्लपञ्चम्यां तिथौ सरस्वतीदेव्याः विशिष्टा पूजा सर्वत्र समाचरिता सोत्साहमिति वार्ता।

■ **हरियाणाप्रान्ते जाटजातेः आरक्षणवादः** प्रवर्धितः वर्तते। भारतीयसंविधानम् अनुसृत्य आरक्षणस्य मात्रा पञ्चाशत्प्रतिशतादधिका मास्तु इति। तादृशः सर्वोच्चन्यायालयस्यापि आदेशः वर्तते। सम्प्रति तु हरियाणाप्रान्ते ४९.५% आरक्षणं विद्यते, तथापि २०% आरक्षणम् इच्छन्ति: जाटजातीयाः। सर्वत्र अग्निकाण्डं, हिंसा, मार्गावरोधः च वरीवर्तन्ते।

■ **अमेरिकादेशस्य अन्तरिक्षविज्ञानसंस्थायां (NASA मध्ये) संस्कृताध्ययनम् -** अस्यां संस्थायां प्राप्तप्रवेशानां विज्ञानिनां प्रशिक्षणकाले वराहमिहिर-आर्यभट्ट-भास्कराचार्य-प्रभृतीनां भारतीयविदुषां ज्योतिःशास्त्रीयसिद्धान्तानाम् अध्ययनम् अनिवार्यरूपेण प्रचलति इति भारतगौरववार्ता खलु। नूनं विज्ञानक्षेत्रेऽपि जगद्गुरुः भवितुमर्हति भारतः।

■ **भारतस्य सुख्यातया सारस्वत-संस्थया साहित्य-अकादम्या** विभिन्न-भारतीय-भाषाभ्यः प्रतिवर्षं साहित्यिक-पुरस्काराः प्रदीयन्ते। ऐषमः संस्कृत-कविलेखकः **डॉ. रामशंकर-अवस्थि-वर्यः 'वनदेवी'** इति स्वीय-संस्कृत-महाकाव्यस्य कृते पुरस्कारमेनम् अलभत। स्वीय-महाकाव्ये तेन भगवती सीता 'वनदेवी'-रूपेण प्रतिष्ठापितास्ति।

■ **छत्रपति-शिवाजिजयन्त्युत्सवः** ऐषमः शुक्रवासरे १९ फेब्रुवारीदिनाङ्के सर्वत्र सोत्साहम् अनुष्ठितः। *(तृतीये पृष्ठे विशेषः लेखः द्रष्टव्यः)*

■ भानुवासरे १४ फेब्रुवारीदिनाङ्के **रथसप्तमी पर्व, नर्मदाजयन्ती** च सर्वत्र श्रद्धया समनुष्ठितौ जनैः। तत्पूर्वमेव चतुर्थ्यां तिथौ श्रीगणेशजयन्ती तथा च वसन्तपञ्चमी इति पर्वद्वयं सुसम्पन्नम्।

तावदेव प्रतिष्ठा स्याद् भारतस्य महीतले।
ज्ञानामृतमयी यावत् सेव्यते सुरभारती॥

सम्पादकीयम्

हीरक (जवाहरस्य) आगारे कृष्णाङ्गारः!

फेब्रुवारीमासस्य नवमे दिनाङ्के घटितया घटनया निखिलः देशः भयाश्चर्येण स्तब्धः अभवत्। तदनु स्फुटितेन जनक्षोभेण देशस्य वातावरणं प्रक्षुब्धं जातम्। घटनां जानन्ति प्रायः सर्वे। दिल्लीस्थिते जवाहरलाल नेहरू विश्वविद्यालये (जे.एन्.यू.मध्ये) आयोजितायां सभायामेकां 'पुण्यतिथि'पर्वणि अफजल-गुरुः हुतात्मा इति उद्घोषितः। पाप(क)मनुगामिन्यः घोषणाः गर्जिताः। भारतदेशस्य सर्वनाशं प्रति कामनाः अभिव्यक्ताः। देशस्य राजधान्यां ननु हृदि स्थित्वा अभिव्यक्ति-स्वातन्त्र्यमिषेण यद्वा तद्वा निरर्गलाः प्रलापाः प्रसृताः। न केनापि नेत्रा, न कयापि (एकां विहाय) प्रसारवाहिन्या तत् गणितम्। यदा आरक्षकैः एतान् छात्रान् प्रति शासनदण्डः प्रयुक्तः तदा विद्यार्थिनां प्रति कृतक प्रेम्णा एते सर्वे छात्रनेतारः आरक्षकान्, केन्द्रशासनं च निन्दितुम् आरब्धवन्तः। नक्राश्रूणि स्रावयन्तः एते नेतारः तेषां अनुचराः, प्रसारमाध्यमानि च न विषयस्य गाम्भीर्यं गणयन्ति, न देशेषु स्निह्यन्ति। यत्र-तत्र-कुत्रापि कूटनीतिम् अन्विष्यमाणाः एते जनाः केन्द्रसर्वकारं विरोद्धुम् अवसरं मृगयन्ति। देशभक्तेः व्याख्या-विषये कुतर्काधिष्ठितं वादम् उपस्थापयन्ति कदाचित् आतङ्कवादिनमपि पूजयन्ति।

तस्याः घटनायाः अनन्तरं यद् सर्वं सम्प्रति घटते तेन मूलविषयः अस्पृष्टो भूत्वा दुर्लक्षितः सर्वैः इति भाति। स्वतन्त्र-भारतं विकासमार्गं प्रति उन्नेतुं युवजनाः एव सक्षमाः भविष्यन्ति अतः ते सम्यक् ज्ञानं प्राप्य देशसेवां कुर्वन्तु इति विचार्य देशस्य प्रथमप्रधानमन्त्रिणः नाम्ना एषः विश्वविद्यालयः स्थापितः। अस्य विश्वविद्यालयस्य मार्गदर्शकतत्त्वेषु एकम् अस्ति - इतः उपाधिं प्राप्य युवानः स्वदेशस्य विकासार्थं कार्यं कुर्वन्तु। अन्यतमं च - प्रसङ्गवशात् स्वप्राणैरपि देशः रक्षणीयः युवजनैः। स्वदेशे स्निह्यन्तः उच्चशिक्षिताः ज्ञान-विज्ञान-पदवीमारूढाः युवजनाः इति प्रथम-प्रधानमन्त्रिणः जवाहरलाल-नेहरू-महोदयस्य स्वप्नम् आसीत्। विश्वविद्यालयाः नूतन-विचाराणाम् आगाराः भवन्तु इति नैकवारं तेन स्वभाषणेषु उक्तम्। सम्प्रति तस्य नाम्ना स्थापिते विश्वविद्यालये देशद्रोहस्य वल्गनाः क्रियन्ते देशविघातकानां पापकरणं क्रियते, 'लाल सलाम' इति माओवादिनः घोषणाः दीयन्ते - (एते त एव माओवादिनः यैः पूर्वभारते विलग्नीकरणस्य अङ्गारः प्रज्वालितः) जम्मू-काश्मीरस्य स्वातन्त्र्यं प्रति प्रलप्यते। एतत् सर्वं अभिव्यक्तिस्वातन्त्र्यस्य आवरणे (?) स्वैराचाररूपेण चलति।

कुतः प्राप्तम् एतत् धैर्यम् एतैः? अन्वेष्टव्यं भवेत्। विश्वविद्यालयजीवनादारभ्य विद्यार्थिप्रतिनिधिनिर्वाचनादिभिः युवानः राजनीतिम् अधीयन्ते। एका नीरोगि-प्रथा कदा राजनीतिरोगजर्जरा अभवत् न ज्ञातं केनापि अथवा दुर्लक्षितं बुद्ध्या। तत्रापि पक्षोपपक्षभेदाः कदाचित् क्षम्याः, न तु राष्ट्रद्रोहः।

सर्वेषु रोगेषु हृद्रोगः (हृद्विकारः) प्राणहारी। देशस्य राजधान्यां, (ननु 'दिल्' (हृदयम्) इति नाम्ना विख्यातायां) देहल्यां स्थिते विश्वविद्यालये देशद्रोहस्य रोगस्य उद्रेकः अपि तथैव प्राणघातकः एव। एतमनुपश्चात् वङ्गस्थिते जादवपुर-विश्वविद्यालयेऽपि एतेषां देशद्रोहिणां विद्यार्थिनां समर्थनार्थं निदर्शनानि जातानि। नैतत् दुर्लक्षणीयम्।

एतत् सर्वमविगणय्य नेतारः बालिशवक्तव्यानि कृत्वा वह्नौ इन्धनमिव कार्यं कुर्वन्ति। अभिव्यक्ति-स्वातन्त्र्यस्यापि काचित् मर्यादा वर्तते। सा न विद्यार्थिभिः अवगता: न नेतृभिश्च।

रसायनशास्त्रमनुसृत्य यद्यपि हीरकस्य कृष्णाङ्गारस्य च परमाणुसंरचना समाना वर्तते। तथापि हीरकः हीरकः एव। परम् अत्र हीरकस्य (जवाहर-)नाम्ना प्रस्थापिते विश्वविद्यालये कृष्णाङ्गाराणामेव संख्या वर्धमाना दृश्यते। स्वदेशद्वेषाग्निना धूमायते परिसरोऽयम्।

दुर्भाग्यवशात् एतादृशम् आत्मघातकं, स्वदेशद्रोहकं वातावरणं सम्प्रति नैकेषु विद्यापीठपरिसरेषु वरीवर्ति। आतङ्कवादसंस्थाभिः वर्धयते एषः विकृतः द्वेषाग्निः। परकीयम् अर्थसहाय्यमपि लभ्यते। जाति-सम्प्रदायभेदान् पुरस्कृत्य दूषायते विद्या-परिसरः। विधिनियमान् अनुसृत्य रक्षाबलस्य प्रवेशः विद्यापरिसरे वर्जितः, अतः देशद्रोहेण प्रेरिताः छात्राः संरक्षिताः भवन्ति। एतस्मिन् विषये तत्रस्थाः प्राध्यापकाः, अधिकारिणः, कुलाधिपतयश्च विशेषरूपेण जागरुकाः भवन्तु। वृत्तमाध्यमानि राजनीतिज्ञाश्चापि एतस्य गम्भीरविषयस्य विपरीतमुद्दीपनं मा कुर्वन्तु। नेतृभिः, सामान्यैश्च जागृतव्यम्, अन्यथा राष्ट्रवैरिणः संवर्धमानाः सन्ति।

यदा एषा घटना देशेन दृष्टा तदा एव अन्या दुर्घटना अस्माभिः ज्ञाता। सियाचिन-हिमनगे जाते हिमखण्डपाते नवसैनिकाः भूमौ समाधिस्थाः। ततः एकः हनुमन्थप्पा षड् दिनानन्तरमपि जीवितः। हिमपूरिते वातावरणेऽपि जीवितः सः देहल्यां कलुषिते वातावरणे प्राणान् उज्झितवान्। ननु अस्याः देशद्रोहिणां घटनायाः अनुभवात् मरणं वरमिति चिन्तितं भाव्यं तेन। एकतः स्वप्राणान् अविगणय्य प्रतिकूलेषु अपि परिस्थितिषु देशस्य रक्षणार्थं सिद्धाः एते भारतस्य ललामभूताः सैनिकाः, अपरतः विश्वविद्यालये देशद्रोहिणः छात्राः। कियान् विरोधाभासः। अस्माकं रक्षकाणां मनोबलं वर्धयितुं, देशं संरक्षितुं च एतेः कृष्णाङ्गाराः सर्वथा भस्मीकरणीयाः एव।

डॉ. वीणा गानु

द्रष्टा राज्यकर्ता - छत्रपतिः शिवाजिमहाराजः।

वीरः धीरः क्रान्तिकारकः, हिन्दुधर्मसंरक्षकः, स्वराज्यस्य संस्थापकः, गोवंशप्रतिपालकः छत्रपतिः शिवरायः। 'लिखति यदि गृहीत्वा लेखनीं दीर्घकालं, कोऽपि तव गुणानां 'शिव'पारं न गच्छेत्' इत्युक्तिः - शिवराजवर्णनस्य कृते अतिशयोक्तिः न भवेत्। अद्यापि सः सर्वेषां भारतीयानां मनस्सु अधिराज्यं करोति इत्यत्र न सम्भ्रमः।

राजा शिवछत्रपतिः मानवतावादि विचाराणां पुरस्कर्ता। सर्वधर्मसमभावस्य प्रचारकः स्वयम् आचरणकर्ता च आसीत्। स राजा यथा स्वधर्मपालनविषये अतीव कर्मठः आसीत् तथैव परधर्मस्य, परमतस्य आदरकर्ता अपि आसीत्।

छत्रपतिः शिवरायः स्वराज्ये अष्टप्रधानमण्डलं स्थापितवान्। अस्य राज्ञः कार्यकुशलतायाः अध्ययनम् अवश्यं कर्तव्यं सर्वैः बुधजनैः। स्वकार्यस्य विभाजनं कृतं तेन। स्वबुद्धिवैभवेन, स्वस्य पराक्रमेण चैव निष्कण्टकं राज्यं निर्मितं, संस्थापितं छत्रपतिना। सः स्वयम् स्वराज्यस्य उपभोगशून्यः स्वामी आसीत्। प्रजारक्षकः, प्रजासंवर्धकः, प्रजायाः हिताय दक्षः न्यायी राजा। स्वसैनिकानां कुटुम्बपोषणार्थं प्रत्येकं प्रतिपदायां द्रव्यं यच्छति स्म।

प्रत्येकं कार्यस्य तस्य पूर्वनियोजनं लक्षणीयमेव; प्रत्येकं संघर्षः मूल्याधारितः। एवमेव स्वेच्छया अथवा प्रयोजनं विना न कदापि शस्त्रोद्धारणं कृतं शिवाजिमहोदयेन। 'स्वराज्यं सुराज्यमस्तु' इत्येकमेव तस्य लक्ष्यमासीत्। तदर्थं प्रथमं तेन साधितः अपूर्वः लोकसङ्ग्रहः लोकसङ्घटनं च। न तत्र कोऽपि भेदः न वा निजपरभावः। केवलं एका एव धारणाऽसीत् - 'यः इच्छति देशसेवाकार्यं सः आगच्छतु।' राजा विलक्षणः चतुरोऽसीत्। सज्जनानां प्राणरक्षकः दुर्जनानां प्राणहारकः च छत्रपतिः। जनानाम् अत्यादरस्यैव स कारणविषयः आसीत्।

केवलं वयसः चतुर्दशे वर्षे तेन प्रथमम् युद्धं कृतम्। तावत्पूर्वं बाल्यकालेऽपि स बालराजा प्रस्तरसिंहासने उपविशति स्म। स्वराज्य-निर्माणमिति केवलमेकमेव लालसा तस्य।

अफजलखानस्य वधे कृतेऽपि तेन खानस्य पुत्रेभ्यः अन्येभ्यः च सैनिकेभ्यः अत्यादरेण प्रेम्णा च पोषणार्थं साहाय्यं कृतम्। तेषामुदरनिर्वाहव्यवस्थायाः योजनार्थे स्वसैनिकान् निर्देशितवान्। अद्यावधिः राज्ञः औदार्यं सहिष्णुता च अस्मान् दीपस्तम्भमिव मार्गदर्शनं कुरुतः।

प्रतिपच्चन्द्रलेखेव वर्धिष्णुर्विश्ववन्दिता ... मुद्रा भद्राय राजते। इति प्रसिद्धा यस्य राजमुद्रा सैव अस्माकं स्फूर्तिप्रदः राजा छत्रपतिः शिवरायः। खिस्ताब्दे १६३० तः १६८० पर्यन्तः तत्रभवतः राज्यमासीत्। महाराष्ट्रस्य स्फूर्ति-देवताऽस्ति शिवरायः। तेन सर्वेषु लोकेषु शक्तिनिर्माणं कृतम्।

अखण्डदक्षतायाः सर्वोत्तममुदाहरणं नाम महाराजस्य अनुशासनम्। राज्ञा सदैव युद्धं कृतं, प्रायः शक्तेः अपेक्षा युक्तेः उपयोगः अधिकः कृतः। सुनियन्त्रितं मानसशास्त्रीयं युद्धं राज्ञा सर्वदा कृतम्। संयमः, सदाचारः, सद्धर्मरक्षणं अपि च सुव्यवस्थितं नियोजनमिति चतुःसूत्रीरासीत् महाराजकार्यस्य।

समुपस्थिते युद्धे - 'यद् किमपि हस्ते अस्तु तदेव मम शस्त्रं भवेत्' इति तस्य धारणाऽसीत्। तेन तथा एव प्रशिक्षणं प्रदत्तमासीत्। तेषां प्रमुखं शस्त्रमासीत् असिप्रचालनम्। तथापि नैकवारं असिना विनैव जितं युद्धं तैः। अदृष्टपूर्वा, अश्रुतपूर्वा चासीत् तस्य युद्धशैली। अतः न केवलं वैरी अपि तु असम्बन्धिनः स्वकीयाः आप्ताः चापि अभिज्ञाः न सन्ति तस्य योजनायाः विषये। अतएव साधुवेषेण मम पुत्रः मत्समक्षमुपस्थितः भवेत् कदाचित् इति साक्षात् जन्मदात्री जिजामाता स्वप्नेऽपि न कल्पितवती।

सर्वेषु जनेषु अस्मिताजागरणं शिवछत्रपतिना कृतम्। सः अजानत् यत् - राज्यसाधना नाम योगः। 'समत्वं योग' उच्यते', अत एव न तेन कदापि भेदभावाचरणं कृतम्। ''सर्वेऽपि सैनिकाः भवन्तु। सर्वे भवन्तु कर्मकाराः।'' स्वकर्मकुशलाः जनाः रणनीतिज्ञा अपि भवन्तु इत्येषा स्थितिरासीत् महाराजस्य राज्ये। केचन कृषकाः, केचन व्यापारिणः, केचन चर्मकाराः, केचन सुवर्णकाराः परं ते सर्वेऽपि स्वराज्यस्य सेवकाः। सर्वेषां मनस्सु एकः एव निश्चयः आसीत् - ''स्वराज्याय इदम्। न मम। मम जीवनं केवलं छत्रपतेः शिवरायस्य आज्ञापालनार्थम्।''

स राजा ज्ञाताऽसीत्। तेन ज्ञायते स्म - 'यद्यदाचरति श्रेष्ठो तत्तदेवेतरो जनाः।' प्रजायाः परिपालनमेव राष्ट्रनिर्माणं राष्ट्रसंरक्षणम्। देशरक्षणार्थं, देवरक्षणार्थं, धर्मरक्षणार्थं च राजसेवकानां च प्राणाः सर्वदा सिद्धाः।

प्रजापालनतत्परः स राजा पर्यावरणरक्षकः अपि आसीत्। क्षेत्रज्ञान् प्रेरितवान्, आरामाणां, विविधानां मार्गाणां च निर्माणं कारितवान्। प्रवृत्तिपरः एषः राजा द्रष्टा राज्यकर्ता आसीत्। 'सन्दीप्ते भवने तु कूपखननं न योग्यम्' इति जानाति स्म। अतएव प्रत्येकं कार्यं पूर्वनियोजनेन सह, पूर्णनियोजनेन सह च तया साधितम्।

अखण्डितायाः दक्षतायाः बहुविधानि उदाहरणानि महाराज्ञः कार्यपद्धतेः विलसन्ति, तथाहि

१) प्रतापगिरिनिकटे सघनवृक्षपरिव्याप्ते प्रदेशे राज्ञा अफजलखानवधः कृतः। परं पुनः नावलम्बिता सैषा योजना।

२) लालमहालदुर्गमध्ये प्रविश्य स्त्रीजनपरिवेष्टितेऽपि शाहिस्तेखानस्य अङ्गुलिच्छेदं कृत्वा सः लज्जायितः शिवाजिमहोदयेन। भीतः सः पलायितः।

नमस्तेभ्यो वीरसुपुत्रेभ्यः !

११ फेब्रुवारी २०१६ तमे दिवसे माध्याह्ने दूरदर्शनपटे काऽपि दुःखदवार्ता दृष्टा - ''हनुमन्ताप्पा कोडाप्पा नामधेयः सैनिकः दिल्लीनगरे रुग्णालये पञ्चत्वं गतः।'' अन्येद्युः वार्तापटे एव वार्ता प्रसारिता सविस्तरम्। सीयाचिनक्षेत्रं सागरतलतः २५००० मीटर उत्तुङ्गं वर्तते। हिमपर्वतानामयं प्रदेशः। अस्मिन् प्रदेशे तापमानं दिवा -१५, रात्रौ च -५० सेन्टिग्रेड तापांशम् एतावत् न्यूनं भवति। अतः अत्र निवासः अतिदुष्करः। चीन-पाकिस्तान-भारत एतेषां सीमाप्रदेशः अयम्। अतः १९८४ तमवर्षतः अत्र हस्तेषु भूशुण्डिं गृहीत्वा अनिमिषनेत्रैः सीमारेषां निरीक्षमाणाः, प्रतिकूलं वातावरणं सानन्दं सहमानाः, विपरीत-स्थितौ अपि स्वप्राणैरपि मातृभूमिं रक्षतः सर्वे भारतीयवीर-सैनिकाः नूनं वन्दनीयाः।

फेब्रुवारीमासे दशसैनिकानां चमूः सियाचिनक्षेत्रे संरक्षण-कार्ये निरता आसीत्। अकस्मात् तत्र अभूतपूर्वा हिमवर्षा अभवत्। ततश्च हिमस्खलनं; हिमस्य विशाला काऽपि भित्तिः अधः पतिता। हा हन्त! सैनिकानां सा चमूः तस्मिन् हिमस्खलने विलुप्ता। अनन्तरम् अन्यया चम्वा कृते अन्वेषणकार्ये नववीराणां शवाः प्राप्ताः, दशमः हनुमन्ताप्पा च जीवितरूपेण प्राप्तः। परं हा हन्त! सोऽपि दिनान्तरे नवदिल्ल्यां रुग्णालये प्राणान् अत्यजत्।

तरुणे वयसि मातृभूमिरक्षणार्थं गृहीतव्रतः, प्रतिक्षणं शत्रुसैनिकान् हन्तुं सज्जाः भौतिकसुखानि अविगणय्य देशसेवाम् आचरन्तः, स्वपरिवारात् दूरे स्थित्वा देशबान्धवानां सुखार्थं युद्धमानाः एते वीराः धन्याः। धन्याश्च तेषां मातरः याभिः तेषाम् अन्तःकरणेषु मातृभूमिसंरक्षणस्य संस्कारः संवर्धितः। 'मातृभूमिः स्वर्गादपि गरीयसी' इति विचारः दृढीकृतः। स्वार्थं परित्यज्य देशसेवार्थं यैः परिवारैः स्वपुत्रः, स्वभ्राता, स्वभर्ता वा देशसंरक्षणार्थं प्रेरितः प्रेषितः च ते परिवाराः सदैव वन्दनीयाः। तेषां बलिदानेन वयमत्र सुखनिद्राम् अनुभवामः। तेषां त्यागेन वयं शान्तिं प्राप्नुमः। किन्तु नूनं स्वार्थपरायणाः वयं सर्वे। यदा कोऽपि राजकीयपुरुषः दिवं प्रयाति तदा सा वार्ता सविस्तरं साडम्बरं प्रकाश्यते, किन्तु यदा कोऽपि वीरः युद्धभूमौ वीरगतिं प्राप्नोति तदा सा वार्ता वार्तापत्रस्य कस्मिन्नपि कोणे प्रकाश्यते। अन्येद्युरेव सर्वे वाचकाः तां वार्तां तं वीरं च विस्मरन्ति। शैक्षणिक-संस्थाभ्यः भागेभ्यः चतुष्पथेभ्यः राष्ट्रपुरुषाणां, धनिकानां च नामानि दीयन्ते, किन्तु देशरक्षणार्थं त्यक्तजीवनस्य वीरस्य नाम् क्वचिदेव प्रदर्श्यते सार्वजनिकस्थानेभ्यः। स्वातन्त्र्यदिवसे सर्वत्र ध्वजवन्दनं विधीयते किन्तु तस्य राष्ट्रध्वजस्य रक्षणार्थं प्रतिदिनं सीमाप्रदेशे सिद्धानां कथाः वृत्तान्ताः वा न श्राव्यन्ते छात्रेभ्यः। स्वजीवनानन्दे निमग्नाः युवकाः समवयसाम् एतेषां देशरक्षणार्थं बद्धपरिग्रहान् वीरान् नैव स्मरन्ति। हनुमन्ताप्पामहोदयस्य स्मरणं न जाने आगामिनि काले भवेत् न वा। 'कर्तारः सुलभाः लोके विज्ञातारस्सु दुर्लभाः' इति भासकवेः वचः सत्यमेव।

नूनं राष्ट्रस्य संरक्षणमतीव महत्त्वपूर्णम्। सुरक्षां विना जीवनं सर्वथा दुष्करम्। इयं सुरक्षा बाह्या अन्तर्गता च। तदर्थं प्रयतमानाः वीराः सैनिकः साहसिनः आरक्षकाश्च महत्त्वपूर्णाः। स्वनियोगं निर्वहन्तः एते युवकाः अकारणं हौतात्म्यं गच्छति तदा प्रत्येकं सहृदयस्य मनः नितरां दूयते। स्वजीवनं देशहितार्थं यैः हुतं तेषां परिवारस्य का गतिः। तेषां वृद्धाः पितरः निराधाराः भवति, तेषां युवत्यः भार्याः वैधव्यमाप्नुवन्ति, तेषां निष्पाप-शिशवः अनाथाः भवति। न गणयति वीरः मातृभूमिभक्तः व्यक्तिगतं सुखं दुःखं वा। ''जन्मान्तरेषु अपि मातृभूमि-सेवार्थम् अवसरः मया प्राप्तव्यः'' इत्येव सः इच्छति। नूनं ''एतां केनोद्दिष्टमसिधाराव्रतमिदम्?'' एष प्रश्नः भर्तृहरिवत् सर्वेषां मनस्सु उद्भवति। तेषां विषये आदरभावः शतगुणितः भवति।

तेषां वीराणां जीवनं यथार्थजीवनम्। अतः ते वीरपुत्राः मातृभूमिरक्षकाः भारतीयाः वन्दनीयाः।

'जयन्तु ते सुकृतिनः मातृभूमिसुरक्षकाः।
माऽस्तु येषां यशःकाये जरामरणजं भयम्॥

● डॉ. सन्ध्या गाडगे

तृतीय पृष्ठतः अग्रे ...

द्रष्टा राज्यकर्ता ...

३) अपरं च अनेन निर्भयतायाः प्रदर्शनं कृतं सुप्रसिद्धे आग्राकारागृहे दृश्यते। तत्र हीरोजिफर्जन्द नामा शूरवीरः सैनिकः सुप्तः। तदनन्तरं मिष्टान्नपूर्णायां पेटिकायामुपविश्य, औरंगजेबस्य कण्टकवत् प्रसृते योद्धसमूहेऽपि शिवरायः परकीयानां नेत्रशृङ्खलाम् अर्धोन्मीलितां कृत्वा परगेहतः स्वगृहं प्रतिनिवृत्तः। सम्पूर्ण विचारेण कृतस्य कार्यस्य, सुनियन्त्रितायाः योजनायाः फलितमेव नु?

अत्यल्पेऽपि अर्थ-साहाय्ये, अल्पीयसि एव समये नैकानां सुविधानां निर्माणं कृत्वा महाराजः जनहृदये स्थानं प्राप्तवान्। सन्मार्गेण यद्-यद् यः इच्छति तद्-तद् स प्राप्नोत्येव। 'प्रजायाः सुखं तदेव राज्ञः सुखम्' इत्यासीत् तस्य धारणा। निर्झरजल-प्रवाहसमाना वाणी आसीत् राज्ञः। शब्द-प्रवाहस्य शुद्धताविषये जागृतेनानेन राज्ञः प्रथमं कृतं कार्यमासीत् अत्यंन्तं स्पृहणीयम्। छत्रपतिना १४०० शुद्धमराठीशब्दानां 'राज्यव्यवहारकोशः' निर्मितः। अस्य क्षत्रियकुलावतंसस्य गोब्राह्मणप्रतिपालकस्य स्त्रीदाक्षिण्यविषये तु कथनं परावाणेरपि परम्। एवं वर्णनातीतं खलु राज्ञः छत्रपतेः चरित्रम्।

● डॉ. विजया विलास जोशी

संस्कृत-भाषा-प्रचारिण्याः सभायाः इदं साप्ताहिकं डॉ. चन्द्रगुप्त वर्णेकरः इत्यनेन सभायाः सचिवेन कृष्णचंद्र एजन्सीज, नागपुरम् इत्यत्र मुद्रापयित्वा संस्कृत-भवने २, पश्चिम-उच्च-न्यायालय-मार्ग, नागपुरे प्रकाशतां नीतम्।